दित्यर्थं परं वेत्युक्तेश्च स्वाभाविकार्थताऽपि तु सर्व्वद० सं० "नन्वदृष्टानिष्टौ जगद्वैचित्र्यमाकस्मिकं स्यादिति चेन्न तद्भद्रं स्वभावादेव तदुपपत्तेः" अतएवोक्तम् "अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः। केनेदं चित्रितं तस्मात् स्वभावादेव तत्स्थितिरिति चार्व्वाकमतम् तस्यायुक्तत्वपरीक्षणं चार्व्वाकशब्दशेषे दृश्यम्।

**आकाङ्क्षा** स्त्री आ+काङ्क्ष—अङ्। १अभिलाषे, न्यायमते २वाक्यार्थज्ञानहेतौ यत्पदं विना यत्पदस्यानन्वयस्तत्पदे तत्पदवत्त्वरूपे, संबन्धे ३ पदान्तरव्यतिरेकेणान्वयाभावे च "यत्पदेन विना यस्यानुभावकता भवेत् आकाङ्क्षा" भाषा० शब्दचिन्तामणौ तु "अथ केयमाकाङ्क्षेत्याक्षिप्य "उच्यते अभिधानापर्य्यवसानमाकाङ्क्षेति" लक्षयित्वा स्वयमेव तद्विवृतं यथा "यस्य येन विनास्वार्थान्वयाननुभावकत्वं तस्य तदपर्य्यसानं नाम, विभक्तिधात्वाख्यातक्रियाकारकपदानां परस्परं विना परस्परस्य न स्वार्थान्वयानुभावकत्वम्। परमते नीलोघटोनास्तीति नीलं घटमानयेत्यादौ नामार्थानां कारकाणाञ्च न परस्परमन्वयबोधः। विशेषणान्वितविभक्त्यर्थानन्वयादिति विशिष्टवैशिष्ट्ये नैवान्वयः। किन्त्वार्थः समाजः। अस्माकन्तु नीलघटयोरभेदानुभवबलादभेद एव संसर्गः। विशेषणविभक्तिः साधुत्वार्था। यद्वा समानविभक्तिकयोरभेदानुभवबलाद्विशेषणान्वितविभक्तेरभेदार्थकत्वम् अतोविशेषणविशेष्यभावानुभावकत्वं तत्तत्पदयोर्न परस्परं विना। द्वारमित्यध्याहारं विना प्रतियोग्यलाभान्न स्वार्थान्वयानुभावकत्वम् विश्वजिता यजेत"मयेदं कार्य्यमिति प्रवर्त्तकं तात्पर्य्यविषयज्ञानं नाधिकारिणं विनेति तदाकाङ्क्षा। यद्वा कर्त्तुरिवाधिकारिणोऽप्याक्षेपादेव लाभ इति तदन्वयोन शाब्दः किन्त्वानुमानिकः। गौणलाक्षणिकयोरननुभावकत्वपक्षे तदुपस्थापितस्याप्यध्याहृतस्येवेतरपदं विना नानुभावकत्वम् घटः कर्मत्वमानयनं कृतिरित्यादावभेदेन नान्वयबोधोऽयोग्यत्वात् तत्तत्पदेभ्यस्तात्पर्य्यविषयतत्तत्पदार्थस्वरूपज्ञानञ्च पदान्तरं विनैव घटमानयतीत्यत्रेव क्रमेण तथान्वयतात्पर्य्येऽपि क्रियाकारकभावेन नान्वयबोधः नामविभक्तिधात्वाख्यातक्रियाकारकपदार्थानामन्वयबोधे तान्येव समर्थानि न तु तदर्थकानि पदान्तराणि अग्निः करणत्वमोदनः कर्म्मता पाकः कृतिरिष्टसाधनता इति पदेभ्योऽग्निनौदनं पचेतेत्यत्रेवान्वयाबोधनात् अग्निकरणकौदनकर्मकपाकविषयकृतिरिष्टसाधनमिति वाक्यं न पदम्। अतएव द्वारमित्यत्र पिधेहीति पदाध्याहारः। क्रियापदार्थस्यान्यत उपस्थितावपि कारकानन्वयात्। असामर्थ्यन्तु स्वभावात्। अनासन्नमप्यासन्नदशायामासन्नभ्रमेणैवान्वयबोधसमर्थमेव। वह्निना सिञ्चतीत्यत्र क्रियाकारकपदयोरन्वयबोधसामर्थ्येऽप्ययोग्यताज्ञानं प्रतिबन्धकं दाहे समर्थस्याग्नेर्मणिरिव। अतएव योग्यताभ्रमात् प्रतिबन्धकाभावे ततोऽप्यन्वयबोधः। न हि स्वभावतोऽसमर्थमारोपितसामर्थ्यमिह भवति पचतिवेति प्रकृते तु पदार्थस्वरूपज्ञानं न त्वन्वयभ्रमोऽपि। पुरुषपदं विनापि राज्ञ इत्यस्य पुत्रेण समं स्वार्थानुभावकत्वमिति न तदाकाङ्क्षा यद्वा त्वयाणां स्मरणेऽजनितान्वयबोधदशायां पुरुषान्वयतात्पर्य्याभावान्नान्वयबोध इत्यथेऽपि तथा। न च पुत्रस्योत्थिताकाङ्क्षत्वात्तेनैवान्वयबोध इति वाच्यं तात्पर्य्यवशात् क्वचित् पुरुषेणैव प्रथमसन्वयबोधात् अतएवान्वयबोधसमर्थत्वे सत्यजनिततात्पर्य्यविषयान्वयबोधकत्वमाकाङ्क्षेति केचित्। प्रकृतिप्रत्ययाभ्यामन्वयबोधे जनितेऽपि वाक्यैकवाक्यतावत् क्रियाकारकपदयोरजनितान्वयबोधकत्वमाकाङ्क्षा। नव्यास्तु पदविशेषजन्या पदार्थोपस्थितिः, घटः कर्मत्वमानयनं कृतिरित्येवंविधपदाजन्यपदार्थोपस्थितिर्वाऽऽसत्तिरन्वयबोधाङ्गमित्यासत्त्यभावादेवं विधशब्दान्नान्वयबोधः त्वयाप्येवंविधपदार्थोपस्थितेनाकाङ्क्षाहेतुत्वेनावश्यमुपेयत्वात् जनितान्वयबोधान्नान्वयान्तरबोधस्तात्पर्य्याभावादित्याकाङ्क्षायाः कारणत्वमेव नास्ति किन्तु स्वजनकोपस्थितेः परिचायकत्वमिति"। अत्र दिङ्मात्रं माथुरी व्याख्या प्रदर्श्यते प्रपञ्चस्तु तत एवावगन्तव्यः। "सिद्धान्तयति अभिधानेति अभिधानपदं करणव्युत्पत्त्या शब्दोच्चारणपरम् अभिधत्ते यतस्तस्यापर्य्यवसानं फलानुत्पादस्तथा च तदुच्चारणजन्यतादृशशाब्दबुद्धौ तदुच्चारणजन्यतादृशशाब्दधीप्रागभाव आकाङ्क्षा इति फलितं तच्च पूर्व्वोक्तरूपेण दुष्टम्। न चाभिधानपदं भावव्युत्पत्त्या शाब्दबोधपरं तस्यापर्य्यसानम् अभावः तथा च तादृशशाब्दबोधे तादृशशाब्दबोधाभाव आकाङ्क्षा इति फलितमिति वाच्यं घटः कर्मत्वमित्यादावतिव्याप्तेरित्यतः पारिभाषिकमभिधानापर्य्यवसानपदार्थमाह यस्येति। यत् पदतिष्ठं यत्पदं विनेत्यर्थः। न स्वार्थान्वयानुभावकत्वमिति न यादृशान्वयबोध इत्यर्थः तस्य तदिति तत्पदस्य तत्पदवत्त्वमित्यर्थः। अपर्य्यवसानं तादृशान्वयबोधेऽभिधानापर्य्यवसानं तथा च यत्पदनिष्ठयत् पदव्यतिरेकप्रयुक्तयादृशबुद्ध्यभावः तत्पदस्य तत्पदवत्त्वं तादृशान्वयबुद्धेरभिधानापर्य्यवसानमिति फलितार्थः। पदत्वमत्र शब्दत्वम्।